अशुद्ध		पृष्ठ. ओळ.		शुद्ध.
३० वृत्तित्या	...	१६—२५	...	वृत्त्या
३१ घृतिगत	...	१६—२७	...	वृत्तिगत
३२ मापयति	...	१७—१६	...	मापद्यते
३३ मद्गृह्मति वेदिमनीः		१९—२७	...	मद्गृहंप्रति वेदिमनी
३४ आस	...	१९—२८	...	आसीत्
३५ कांताकांता	...	२०— ९.	...	कांता
३६ चक्ष्यताम्	...	२३— ७	...	कूयताम्
३७ यद्दिछध्यं	...	२५—२६	...	यच्छिप्यम्
३८ निन्धावग्रासु	...	२५—२६	...	निन्धास्वग्रासु
३९ जराक्रान्तं	...	३१— ५	...	ज्वराक्रान्तं
४० कंचन्	...	३३—११	...	कंचन
४१ घकद्यत्वे	...	३६—१६	...	घद्यकत्वे
४२ ददष्ठ	...	३४— ३	...	ददष्ट
४३ ढेष्ठी	...	३५— ९.	...	ढेष्टि
४४ भजेयुः	...	३७— ८	...	भजेरन्
४५ कांचित्	...	३८— ४	...	केनचित्
४६ मनोरपि	...	३८—२०	...	मनुरपि
४७ दयया	...	३९—२७	...	दधया
४८ चातुर्वर्णेन	...	३९.—२८	...	चातुर्वर्ण्येन
४९. द्विसहस्रं	...	४२—२०	...	चतुः सहस्रं
५० घापणे	...	४५— १	...	आपणे
५१ यतिश्रुतां	...	४५— ५	...	येतिश्रुतौ
५२ कृच	...	४६—१६	...	कच
५३ मनुष्यानां	...	४६—२६	...	मनुष्याणां
५४ पुनः	...	४७—२४	...	पुत्रः
५५ द्विग्दपोनीन्	...	४८—१३	...	प्रातरादद्योमीन्
५६ समुपदिष्टइति	...	४८—२१	...	समुपदिष्टमिति
५७ सतां	...	४९.—१०	...	सति
५८ कथनेन गर्यं	...	४९.— ९.	...	कथनेन म सर्वं

॥ चतुर्विधपुरुषार्थविचारः ॥

श्रीरस्तु

प्राचीना ऋषयः पुराणपुरुषं सच्चित्प्रमोदात्मकं ।
यं ध्यात्वा पुरुषार्थजातमखिलं पूर्वांतरा लेभिरे ॥
तं देवं निजभक्तरक्षणपरं लक्ष्मीपतिं मंदधीः ।
संसारोग्रभुजंगभीतिविकलो मोक्षाय चाहं भजे ॥

भो भोः सभ्याः, सभालंकाराः, स्वपांडित्यचंडप्रतापपरिखंडित-
पाखंडिखंडप्रचंडोद्यमोदाराः, परमसुरसस्वरसनाग्ररचनानिबद्धगीर्वाण-
वाणीमनोहराः, सरस्वतीकंठाभरणहीरकवराः, विद्वद्वराः विदांकुर्वंतु
तत्र भवंतः नाहमिमं लेखं स्वासर्वपांडित्यगर्वभारभ्रमः स्वपांडित्यं दर्श-
यितुं लिखामि, किंतु दुर्निवारघोरकामक्रोधादिभीषणभोगिनिवासभयं-
करापाराज्ञानांधकारपरिपूर्णायां संसारगुहायां पतितानां मूढजनानां
ज्ञानदीपप्रकाशदानेनोद्धाराय ॥ अत्र च प्रथमतः पुरुषार्थशब्दस्यार्थं
निरूप्य धर्मार्थकाममोक्षरूपाणां चतुर्णामपि पुरुषार्थानां स्पष्टतया
विवरणं कृतं मोक्षस्य परमपुरुषार्थतया तत्र च मतबाहुल्येन षण्णां
नास्तिकानां षण्णामास्तिकानां च मतानि सारतया प्रतिपादितानि ॥
ततश्च क्रमेणाचाररूपं सनातनधर्मस्वरूपं सम्यक् विविच्य चातुर्वर्ण्यं
संप्रति विद्यते नवा, तदिष्टमनिष्टं वा, तत्सफलमफलं वा, अनादि वा
सादि वा, इत्यादिशंकामुद्भाव्य समीचीनतया नवीनरीत्या समाहितं ॥
अग्रे च एते पुरुषार्थाः सर्वैर्लभ्या न वेति विचारे न
च सम्यगुल्लिख्य, निर्णीय च तत्त्वं, सर्वोऽयं
अस्मिन् लेखे मोक्ष

री

लेखदर्शनेन विषयी भविष्यति ॥ तस्मात् अनाद्यज्ञानशृंखलानिगडित मतिचरणास्ते दीना जीवा मदीयमिमं लेखं दर्शं दर्शं, निष्कामबुद्ध कर्माणि कारं कारं, दीनोद्धारपरायणं नारायणं स्मारं स्मारं, सुकृतजा चायं चायं, यथाकाममिहलोकेऽर्थकामौ लंभं लंभं, धन्याः संतः, शरद्घन घनसारसारायितचित्तकमलाः प्रायणांते च भजंतु सच्चिदानंदरू परमपुरुषार्थं मोक्षम्॥ अस्तु अस्य लेखस्य सर्वेश्वरो हरिर्निदानमिति तमसंलय जयजयेति सुनिर्घोषैः संभावयामि अंते च जगत्पालकं परमेश्व प्रणम्य, मान्यान् वो विज्ञापयामि अस्मिल्लेखे कृपाकटाक्षदानायेति शम्॥

॥ श्रीः ॥

॥ पुरुषार्थशब्दार्थनिर्वचनम् ॥

ननु कः पुरुषार्थशब्दस्यार्थः न तावत्पुरुषेणार्थ्यते इति व्युत्पत्त्या पुरुषेच्छाविषयएव पुरुषार्थशब्दस्यार्थः इति सांप्रतम् तथासति घटस्यापि जलाहरणार्थं पुरुषेण कांक्षितत्वात्घटोऽपि पुरुषार्थः स्यात् नचेष्टापत्तिः तथासति घटपटादीनां नानात्वात्पुरुषार्थानामपि बहुत्वापत्त्या तेषां चातुर्विध्यं श्रुतिस्मृतिकल्पितं व्याकुप्येतेति चेदत्र ब्रूमः। सुखं दुःखाभावश्च पुरुषार्थशब्दवाच्यौ । तथाहि पांसुलपादं हालिकमारभ्य महामहोपाध्यायं सर्वोऽपि जनः स्वसुखायैव यतमानो जगति दरीदृश्यते सर्वस्योत्पन्नमात्रस्य जंतोरियमाशीर्नियताऽवलोक्यते 'मानभुवं भूयासम्' तथा च योगसूत्रम् ॥ 'तासामनादित्वमाशिषो नित्यत्वात्' इति एवं च सिद्धं सुखं सर्वैरिष्यते । यथा सुखस्य सर्वप्राणिकांक्षितत्वं तथैव दुःखाभावस्यापि. इति सोऽपि पुरुषार्थः॥ दुःसहनवज्वरव्याधिव्याकुलितमना मानवस्तद्दुःखपरिजिहीर्षुः कटुकं विषायितमप्यौषधं पिबति, तत्कस्य हेतोः ? ज्वरदुःखपरिजिहीर्षया ॥ तथा च दुःखाभावोऽपि पुरुषेच्छाविषय इति तस्यापि पुरुषार्थत्वम् ॥ इमौ तु स्वतः पुरुषार्थौ ॥ स्वतःपुरुषार्थत्वं च यज्ज्ञानं सत् स्ववृत्तितयेष्यते तत्त्वं इतरेच्छानधीनेच्छाविषयत्वमितियावत् ॥ अन्यत्तु आमणुकमामेरुपर्यन्तं सर्वमपि परम्परया पुरुषेच्छाविषयो भवति इति तदपि परम्परया पुरुषार्थत्वं भजते ॥ ननु यदि सुखं दुःखाभावश्च द्वावेव पुरुषार्थौ, तदा चत्वारः पुरुषार्था इति कथं संगच्छेतेतिचेन्, परम्परयैव पुरुषार्थत्वमिति ब्रूमः ॥ धर्मार्थकाममोक्षाणामिच्छाहि तदितरसुख दुःखाभावेच्छाधीनैव ॥ तथा च तेषामपि परम्परया पुरुषार्थसाधकत्वाद्गौणं पुरुषार्थत्वमित्यलम् ॥ अधिकमग्रे स्फुटीभविष्यति ॥ केचित् सुखमेवैकं स्वतः पुरुषार्थः, दुःखाभावेच्छातु सुखसंपिपादयिषयैवेति तस्य न स्वतः पुरुषार्थत्वम् ॥ नच विनि इति वाच्यम् । सुखी स्यामित्याकारकेच्छायाएव .मेव वांछति । दुःखाभावस्य तु तन्न मास्तिर्भा रूपेणवेति सुखमेव पुरुषार्थ इति वदन्ति ॥ :

अतएव निरर्गलदुःखासंभिन्नसुखाभिलाषी संसारी दुःखपरिहारे यथा यतते तथा सुखार्थं न यतते ॥ अपरं च वैषयिकं सुखं सविषान्नमिव न विज्ञानामिच्छाविषयः । संसारदुःखनिवृत्तिस्तु सर्वेषामेवेति सैव पुरुषार्थः ॥ नच नित्यं सुखं तदिच्छाविषय ॥ तस्य सत्त्वे मानाभावादिति भावः ॥ वस्तुतस्तूभयमपि पुरुषार्थमिति मूलः ॥ नच नित्यसुखे मानाभावः, तस्य मोक्षमत्त्वे श्रुतिप्रतिपादितत्वात् ॥ अतः सिद्धं आत्यन्तिकदुःखाभिन्नसुखदुःखाभावरूपमोक्षात्पुरुषार्थसाधनत्वाद्धर्मार्थकामनोक्षाणामपि पुरुषार्थशब्दवाच्यत्वम् ॥

॥ धर्मपदार्थनिर्वचनम् ॥

ननु को नाम धर्मपदार्थः अत्र प्रसिद्ध एव धर्मपदार्थः (धर्माधर्मो रूपादिभिन्नगुणो) इति तर्कसंग्रहोक्तेरिति चेन्न ॥ सत्ये वदन्ती मेरव धर्ममेव चरतीति शिष्टप्रयोगदर्शनान्यत्र [illegible] धर्मपद-वाच्यत्वात् । एवं सन्ध्यादीनि कर्माणि सभाचारः । यति धर्मं चरतीति प्रयोगदर्शनात् तथापि धर्मपदस्य [illegible] नानार्थत्वप्रसंगः । अन्यतरस्य नानार्थत्वे ॥ तस्मात् कोऽयं नाम धर्मपदार्थः [illegible] ॥ [illegible] इति [illegible] ॥ यदि [illegible] ॥ [illegible] इति [illegible] ॥ [illegible] इति [illegible] धर्मः, इति [illegible] । [illegible]

संस्कारकत्वात् गन्धपुष्पादिषु धर्मत्वं गौणः ॥ एवमेवाधर्मोऽपि
निषिद्धकर्मसु ॥ यद्यपि च अगम्यागमनादिष्वधर्मत्वं गौण
ननु वेदमात्रप्रामाण्यवादिनां ब्राह्मणादीनां सर्वेषामेतद्धर्मलक्षणम्,
सर्वेषां तन्नैतदुपलक्षणम् ॥ वेदनिषिद्धाचारिणामपि तेषां प्रमाणाभूते
बुद्धाचार्यादिप्रोक्तग्रन्थे धर्मत्वमनात् ॥ न च वाच्यं, यस्य यत्र
दर्शनात्प्रवृत्तस्य स धर्मोऽस्ति, तदाचरणमेव तस्य धर्मस्तत्र
दिति । तथाप्यननुगमः, शुद्धाशुद्धत्वाभेदेन सर्वथा धर्मप्रधानाय
मात्राप्यप्रसंगश्च ॥ न च श्रुतयः स्मृतय एव प्रमाणम् नान्यत्पुराणादय-
स्तन्त्रादिवचनाद्यादयः श्रेयान ॥ तथा श्रुतिर्श्रोतस्मार्तानित्यानन्दतः प्रमाणम्
इत्यपि विद्यारण्यादिमतविदः मर्यादा इति युष्माकं मतिः तथा
पुराणप्रणेतृषु पद्मपुराणादिषु तेषां प्रतीतिरिति वेत् (अप्रसिद्धमिषा)
पौरुषेयत्वेन तस्य निर्दुष्टत्वात् ॥ न च तस्मादिति वाच्यम् ॥ वेदस्या-
प्रामाणिकत्वात् ॥ पुराणस्य च प्रामाणिकत्वात् ॥ जैनादिप्रणीतधर्मग्रन्थानां तु पौरुषेयत्वेन
प्रामाण्येऽपि स्मृतित्वेव प्रमाणं इति वाच्यम् ॥ न च मन्वादिप्रणी-
तत्वात् ॥ तथा च जैमिनेः सूत्रम् (श्रुतिलिङ्गवाक्यप्रकरणस्थान समा-
ख्यानां समवाये स्मृति पारदौर्बल्यमर्थविप्रकर्षात् ३।३।१४ –) तस्मात्
वेदविहितमार्गेणैव गच्छतां धर्मो, नान्येषामिति युक्तमेव वेदविहितकर्म-
जन्यत्वम्, धर्मस्य लक्षणम् ॥ धर्मं तु शान्तिप्रमुखपरायणाः परद्रोहभीरवो
वदामः ॥ वैदिककर्मणां सर्वेषां फलं चित्तशुद्धिरेव ॥ अनाद्यज्ञान-
कल्पनानायोनिसंचारसंचितमार्गणितपापराशीनां चित्तदूषणानां नाश-
व चित्तशुद्धिपदार्थः ॥ यथा कल्पनकलुषिते गंगाजले पार्वणशश-
धरस्य चंद्रस्य प्रतिबिम्बं स्पष्टतया न समुद्गच्छति, एवं कामक्रोधादि
कलुषिते चेतसि सच्चिदानंदरूपस्यात्मनः प्रतिबिम्बं न ज्ञायतेऽतोऽज्ञानं
दुःखमिति । ततः प्रथमतः चेतःशुद्धिरपेक्षितेति सा यथा वैदिक
कर्मणां निष्कामाचरणेन जायते एवमन्यविहितेभ्यः कर्मभ्यो भवती
प्रमाणाभावः ॥ अभ्युदयादीनि तु फलानि प्ररोचकानीति मोक्ष-
निरूपणावसरे प्रदर्शयिष्यामः ॥ अतो निष्कामकर्माचरणमेव चित्त-

अतएव निरर्गलदुःखासिप्रहारजिहीर्षुः संसारी दुःखपरिहारे यतते तथा सुखार्थं न यतते ॥ अपरं च वैषयिकं सुखं सविष न विज्ञानामिच्छाविषयः । संसारदुःखनिवृत्तिस्तु सर्वेषामेव पुरुषार्थः ॥ नच नित्यं सुखं तदिच्छाविषयः ॥ तस्य सत्वे मान दिति भाष्यन्ते ॥ वयंतूभयमपि पुरुषार्थमिति ब्रूमः ॥ नन नि मानाभावः, तस्य मोक्षप्रस्तावे सिषाधयिषितत्वात् ॥ अ आबालवृद्धकांक्षितसुखदुःखाभावरूपसाक्षात्पुरुषार्थयुग्मसाधन र्थकाममोक्षाणामपि पुरुषार्थशब्दवाच्यत्वम् ॥

॥ धर्मपदार्थनिर्वचनम् ॥

ननु को नाम धर्मपदार्थः नच प्रसिद्ध एव धर्मपदार्थ धर्मसंस्काराश्चतुर्विंशतिगुणा) इति तर्कसंग्रहोक्तेरिति वाच्य वदन्तं मेऽस्य धर्ममेव वदतीति निष्प्रयोगदर्शनात्तत्वारये वाच्यत्वमत्वात् । एवं सन्ध्यादीनि कर्माणि समाचरन्तं मा प्रयोगदर्शनात् तत्रापि धर्मपदस्य वाच्यत्वमस्त्वात् वा भन्यायश्च नानार्थत्वं ॥ तस्मात्कोऽयं नाम धर्मपदार्थः इति स्वर्गकामोयजेतेत्यादि वेदवाक्येन स्वर्गयागयोः क बोध्यते ॥ एवं कार्यकारणयोः सामानाधिकरण्यं मन्याश न्यते ॥ यदि कालान्तरे देहो मनुष्याणां गते निपातेऽपि धर्ममपि यागस्य क्रियास्थानात्, इति तस्य तद्गत्यात पारलौकिकत्वात्समानाधिकरणयोरनयोः कथं कार्यक भवत्येव, यस्माद् यागस्य धर्म स्वर्ग नदयमत्कालानुग रितं करोति, स एव संस्कारः शास्त्रे धर्मपदेन व्यवह्रिय स्तु तदेव कर्म मुख्यकर्मेण निवृत्तेरिति वदन्त्यस्तस्य तस्मादेव धर्मपदवाच्यो मन्यन्ते । ये वैदिकाभ्यासाः प मन्यन्ते ॥ यथातथा भवतु ॥ वेदादिविहितकर्मजन्यो गुणवि वदन्ति ॥ सत्रतत्वान्तरेव धर्मपदवाच्यः । यथा पुत्र अन्तर्वेदनि कामनिष्ठया कृत्वा व्यवहारैः एवं का

(अर्थशब्दार्थनिर्वचनम्)

ननु कोऽयमर्थशब्दार्थः॥ उच्यते अर्थ्यते सर्वैरपि जनैः सोऽर्थः इति मार्गलोपपदार्थितमिति वाच्यम्॥ तथासति धर्मस्यापि सर्वैरिष्टत्वाद-तिव्याप्तिरिति चेत्सत्यम्॥ अर्थशब्दो हि योगरूढो द्रव्ये धनापरपर्याये॥ तथा च (अर्थमात्रियमत्यसारसिद्धेति) साहित्यदर्पणे, लोकेऽपि तेन वणिजा महानर्थस्तत्र संपादित इति प्रयुंजानाः, प्राकृताः जनाः, धनमेवार्थशब्दवाच्यं मन्यन्ते । व्यवहारतोऽपि शक्तिग्रहः । तथा च द्रव्यस्यापि सुखसाधनतया दुःखनिवारकतया भवत्येव पुरुषार्थत्वम् । ननु द्रव्यस्य कीदृशं सुखं प्रति साधनत्वम् । न लौकिकस्य, तस्य सविषान्नपदोपमतयाऽपुरुषार्थत्वात् । नहि सचेतनः सविषमिदमन्नमिति श्रुत्वा तद्भक्षणाय यतते । नाप्यलौकिकस्य, तस्य तं प्रत्यन्यथासिद्धत्वात् । नहि धनाढ्यएव मोक्षं लभते न दरिद्रीति नियमो मोक्षशास्त्रेषु दृष्टः । प्रत्युत दरिद्री विरक्ततया कदाचिन्मोक्षं लभेतापि । धनमदस्य नाशाप्यस्ति । तत्त्वज्ञानादेव हि मोक्षो भवति। तथा च श्रुतिः। (तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय) तत्त्वज्ञानं विरक्तस्य, न संपन्नस्येति स्पष्टमेव । किंच अलौकिकसुखं प्रति द्रव्यस्य कारणत्वं न भवतीति श्रुतिरेव निषेधति (न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः) । तथा योपरिदर्शिताः श्रुतयोऽप्यलौकिकमोक्षरूपसुखं प्रति साधनत्वाभावं वर्णयन्ति द्रव्यस्येति कथं तस्य पुरुषार्थत्वम्॥ नच विप्रलब्धो भवान् द्रव्यसम्पादनासमर्थेन केनचिद्दण्डिना । एते काषायवस्त्रधारिणः स्वयं द्रव्यसम्पादने मूढाः परान्स्वार्जितद्रव्यभोगभाजः सरलमतींस्त्वादृशानुपदिशन्ति अरे, किं विषयकर्दमे लुंठसि कीटइव, किं चुम्बसि लालामांसरुधिरमयं कामिनीवदनम्, स्मरेश्वरम्, योहि परलोके त्वामनुग्रहीष्यति । वितर ब्राह्मणेभ्यो दक्षिणामित्यादि । एवं तानसदुपदिश्य तथा मल्लमल्लकपान्विदधति। वन्दाति च निर्लज्जाः, भविष्यति च ते परलोके सुखमित्यादि चार्वाकोक्तिः श्रेयसी । द्रव्यस्य सुखापेक्षया दुःखदातृत्वमेवाधिकम् । अन्यस्मिन्काले यथातथास्तु ।

भोगकालेपि द्रव्यं क्षयित्वानुसंधानेन भोक्तृभ्यो दुःखमेव ददाति। अस्मिन्नर्थे प्रसिद्धामेकामाख्यायिकां कथयामि पुराकिल महम्मदनाम कश्चन यवनपतिरासीत् । स च समग्रां भारतभूमिं निर्लुठ्य द्वादशवारं निरवधिद्रव्यं स्वराजधानीं निनाय ॥ एवं क्रमेणातीतेषु केषुचिद्वर्षेषु समुपस्थिते तस्य प्रायणकाले सर्वं स्वधनं दिदृक्षुः स महम्मदः स्वभृत्यवर्गमाज्ञाप्य स्वपुरतः सर्वेषां द्रव्याणां पृथक्पृथक्राशीन् कारयित्वा, तं कृतान्पर्वतप्रायान्महतो रत्नराशीन् मेरुकल्पं सुवर्णसंचयं, रजतगिरिनिभं रजतराशिं,एवमन्यांश्च द्रव्यौघानालोच्यैभिः साकं मम वियोगोऽचिरादेव भवितेति जानन्बालक इव भूमौ निपत्य स्वहस्ताभ्यां मुखकमलं पिधायेत्थमवदत् । अहो ? मया खलु वृथा हता दीना जीवाः, नैव सुखस्य लेशोपि मद्भाग्ये। इदानीं तु निरवधिसमग्रजन्मकृतकुकर्मजातसंपादिता यामीर्यातनानुभवितुं क्रूरैर्यमकिङ्करैस्ताड्यमानः क्वगच्छामीति नवेद्मीति वदन् मुहुर्मुहुर्मूर्छन् क्लेशानसंख्याननुभवन् प्राणान्व्यजहात् । तुकारामनामा साधुवर्यस्तु निस्पृहः सर्वदैव देवनामग्रहणतत्परोऽन्तकाले हसन्निव वैकुण्ठमलंचकार । तस्मात्सर्वमिदं तृष्णामूलं द्रव्यमनर्थायेति चेत्सत्यम् वेदविहितकर्माचरणसाहाय्यकरणेनार्थ य सुखसम्पादकत्वं, न स्वतः । अतस्तस्यापि पुरुपार्थत्वम् ॥ अपि च नित्योदरयोगक्षेमसंपादनेनापि तस्य ज्ञानजननद्वारा परमार्थोपयोगित्वात् ॥ आहारादिभि स्वस्थे चेतसि ज्ञानवृत्तिरुदेतीति सार्वजनीनमेतत् ॥ अधिकं तु परमपुरुषार्थविचारे सुस्पष्टमुपपादयिष्यामः ॥

(कामशब्दार्थविचारः)

ननु कः कामशब्दस्यार्थः ॥ न च इच्छार्थककमुधातोर्थञि काम इत्यस्य रूपस्य निष्पन्नत्वादिच्छैव काम इति वाच्यं, तथासतीश्वरस्यापि भुवनमिसृक्षावत्त्वात्तस्यापि सकामत्वापत्तिः ॥ अपि च काम इदानीं सकामो भवतु, इत्यादि महाकविप्रयोगदर्शनात् मदनेऽपिकामशब्दस्य शक्तिः स्वीकार्या ॥ तथा च नानार्थत्वप्रसंग इतिचेत्कल्पनां कामशब्द-

कामः पुरुषार्थतां प्राप्नोति ॥ नच दुःखं तन्न् महदिति व
तस्यागन्तुकत्वात् ॥ मुख्यं फलं तु पुत्रस्येदमेव [illegible]
पितुः सर्वे संसारबन्धमुक्तस्य मोक्षः । तदित्थं संप्रतिपत्ति
यदाहि जातं पुत्रं सम्यगनुशास्य स्वस्य प्रासं प्रायणमिंगितैः
करोति । तदा तं पुत्रं स्वसमीपमाहूय ब्रूते । यास्याम्यहं प
येचानुष्ठिता यज्ञा ये चाऽननुष्ठिताः तेषां सर्वेषां त्वमेव भोक्तेति
ब्रूते ॐमिति । अथ स कृतकृत्यः पिता समष्टिरूपेण मिलितःप्राप
लोकं प्राप्नोति । आस्तामियं बृहदारण्यकोपनिषत्कथा । तत्सिद्ध
दनन्तमिति मुक्त्यर्थं पुत्रस्येषणेति ॥ तदर्थं जायासंगाकांक्षेति भव
तस्य पुरुषार्थत्वम् ॥ अलमिदं मिदानीमेतावदेव मोक्षविचारे सु
निरूपयिष्यामः ॥

(मोक्षनिर्वचनम्.)

ननु मोक्षो नाम कः पदार्थः ॥ नन मुच्ल् मोक्षणे इत्यस्माद्धातो
मन्ते कृते मोक्ष इति रूपं ॥ तथा च देहपातएव मोक्षः ॥ उक्तं च मोक्षाय
भिः 'भस्मीभूतस्य देहस्य पुनरागमनम् कुतः' इति वाक्यम् ॥ दार्शनि
कानां विविधवेतिति चेन्नश्रृणु ॥ आत्मविचारं प्रस्तुत्य प्रचलितेषु विवि
स्वपिषु दर्शनेषु पूर्वं यावन्न निर्णयं यथा कथं मोक्षस्वरूपं वर्णते ॥
तदुपरि युक्तायुक्तविचारःस्यात् ॥ (देहएव आत्मेति चार्वाकाः)
(बुद्धिरात्मेति बौद्धाः) ॥ (परिणामी पदार्थ इति जैनाः) ॥ (जगदर्थ इति
नैय्यायिकाः) ॥ (सच्चिन्मयोऽर्थ इति सांख्याः) ॥ (सच्चिदानन्दरूपोऽजोऽह
इति वेदान्तिनोऽद्वैतिनः) ॥ (देहमुक्तिर्मोक्ष इति चार्वाकाः) ॥ (विज्ञा-
[illegible] आत्मविज्ञानम् [illegible] बौद्धाः) तथापि चत्वारो बौद्धाः,
शून्यवादिनः, विज्ञानमात्रास्तित्ववादिनः, बाह्यानुमेयपदार्थवादिनः,
बाह्यप्रत्यक्षवादिनः ॥ तत्र शून्यमेव मोक्ष इति शून्यवादिनोविदन्ति ।
[illegible] निरुपाधिविज्ञानप्रवाह [illegible]
[illegible] ॥ [illegible]

पातकं स्यात् । न च भवति मृतशरीरस्य दाहे कश्चन पातकीति शरीरातिरिक्तात्मसिद्धिः ॥ न च शरीरातिरिक्तात्मवादिनोऽप्येष दोषः ॥ तन्मते सर्वत्र व्यापकस्य आत्मनः शरीरावच्छेदेनैव दुःखादेरुपलब्धेरिति वाच्यम् ॥ प्राणसहितशरीरस्यात्माधिष्ठानत्वेन तस्योच्छेदजन्यदुःखदानद्वारेणैव तस्य हिंसात्वात् ॥ त्वन्मते शरीरस्यैव सुखदुःखाश्रयत्वात् मृतशरीरदाहदाहस्थले हिंसा दुर्वारैव ॥ किंच वीतरागस्य शरीराभिमानहीनस्य मोक्षकथनादपि शरीरातिरिक्तात्मसिद्धिः ॥ त्वन्मते शरीरस्यैवात्मत्वात् तस्मिन् कस्य विरागः ॥ इति सर्वथानुपपन्नो ऽतिस्थूलमतिश्चार्वाकपशुः ॥ अतो देहस्य नाशएव मोक्ष इति तस्य सिद्धान्तोपि न संगच्छते इत्यलं ॥

(बौद्धमतेमोक्षविचारः)

बौद्धास्तु चत्वारो माध्यमिकसौत्रान्तिकवैभाषिक योगाचार भेदेनेति पूर्वमेवोपपादितं ॥ तत्र माध्यमिकमते सर्वशून्यतैव मोक्ष इति सुतरामनुपपन्नं ॥ सर्वस्यैव शून्यत्वे कस्य वा मोक्षः ॥ मोक्षो नाम निरतिशयं सुखं दुःखाभावश्च ॥ सुखं नाम सर्वदा केनाचिदनुभूयतएव ॥ नहि अज्ञातसत्तां सुखादीनां कश्चित्स्वीकुरुते ॥ एवंच सुखरूपमोक्षस्य मोक्तृभावादनुपपत्ति ॥ अपि च सर्वोपि सचेतनः स्वसुखायैव प्रयतमानो लोके दरीदृश्यते ॥ मोक्षोपि सुखरूपः तस्मात्सौ यत्नः सदात्मवादिनां युज्यते ॥ त्वन्मते तु आत्मोच्छेदरूपमात्मन्यासादर्थं कथं सचेताः प्रयतेत ॥ प्रयतमानश्च कथं देवानां प्रियेष्वपश्चिमतां न भजेत ॥ विज्ञानास्तित्वमात्रवादिनां मते संभवेदपि ॥ तन्मते न सर्वशून्यता मोक्षः किंतु विनश्वरा इमे भावाः इति नयादंतर्वर्ति अनाद्यज्ञानजनितसंस्कारकलुषितं विज्ञानम् तत्तदाकारेण परिणमति ॥ ततश्च बहिर्नानाविधाः पदार्था भासन्ते ॥ यदा तु शून्यंशून्यमिति विभावनीयमित्यादि सद्गुरूपदेशात् विगतविषयवासनं सदंतःकरणं स्वरूपेणैव परिणमतितराम् तिष्ठति तदा सावस्थामोक्षपदेन व्यवह्रियते ॥ न च बहिः सत्त्वशी-

भूतानां पदार्थानां चित्तकल्पितत्वे किं प्रमाणं अपिच यदा घटं पश्य
देवदत्तस्तदापि सोऽस्त्येवान्यदापि सएवेति देवदत्तोपि घटोऽन्यएवे
कथंचित्स्थैर्यत्वाभावा इतिनियः॥ कथंच विज्ञानस्य तस्य मोक्षावस्था
परिणामित्वामितिवाच्यम्॥ इदं रजतं, एष घटा इत्यत्र भ्रमप्रमा साध
रणं ज्ञाने सर्वत्र प्रथमं ज्ञानं तस्य पदार्थस्य जायते ॥ अथ च
बहिरवभासते नैवं ज्ञानं पदार्थाव्यभिचारि । स्वप्नस्थले पदार्था
सन्ति ॥ अथ च ज्ञानं जायते ॥ तस्माज्ज्ञानमेव सर्वं तत्तद्विषयाकारेण
भासमानं भासते न परमार्थसद्वस्तु ज्ञानाद्भिद्यते॥ अपि च यथा भ्रम
स्थले इदं रजतम् इत्यत्र रजतस्य बाधो जायते नैवमिदन्त्वस्य, तस्य
पारमार्थिकत्वात्॥ तथाचान्तर्वर्ति रजतं बहिरवभासते॥ बहिः ससर्ग
मात्रं बाधितं भवति इत्यागतमेव भावानां चित्तकल्पितत्वम् ॥ एवं
मोक्षावस्थायामपि विज्ञानं परिणमदेवावतिष्ठते ॥ यत्तावत्क्षणिकमिति
व्याप्तेः ॥ एतन्मते यद्यपि कथंचिन्मोक्षार्थं प्रवृत्तिः संगच्छेत परंच
कृतविप्रणाशाकृताभ्यागमस्य दोषस्य दुर्वारत्वम् ॥ तथाहि अंतःक-
रणं हि क्षणिकमेव सत्त्वात् ॥ इति अधुना मया यतितव्यं मोक्षार्थम् ॥
मोक्षो हि नामानंतजन्मसाध्यपुण्यसंचयसाध्यइति तदवस्थायां न प्रयत्न-
कृदंतःकरणम्, मोक्षसुखभुक् अन्यदेवेति कृतविप्रणाशाकृताभ्याग-
मादुर्वारएव ॥ न च तदेवान्तःकरणं स्वपरिणामरूपेण तदवस्थायां
विद्यते इति वाच्यम् ॥ परिणामस्य अन्यत्वात् ॥ अन्यथा पशुदेह-
धारणावस्थायां विद्यमानमन्तःकरणं मनुष्यदेहे प्राप्तेपि स्वोचितां क्रियां
कुर्यात् ॥ अपिचान्तःकरणमेवात्मेतिनसाधु ॥ अन्तःकरणस्य भाव-
विकारत्वात् जडत्वम् तथाच तस्य चेतनत्वं व्याहतम् ॥ न च यथा
दीपो जडोपि घटादीन् जडान्पदार्थानवभासयति तथा चित्तं जडमपि
घटादीनवभासयेत् आत्मानमपीति नकाचिदनुपपत्तिरिति वाच्यम् ॥
दृष्टान्तवैषम्यात् ॥ दीपोहि चक्षुःसंयोगमपेक्षते नहि जनुपान्धो
निबिडान्धकारनाशकारिणीं प्रदीपिकामपि पश्यति तत्कस्य हेतोः ।
नेत्रस्याभावादिति ॥ आत्मानं सर्वेपि काणाः कुब्जा बाला अपि
जानन्ति ॥ इति आत्मपक्षे प्रदीपस्य न दृष्टान्तत्वम् ॥ एतेनैवापरा-

पातकं स्यात् । न च भवति मृतशरीरस्य दाहे कश्चन पातकीति शरीरातिरिक्तात्मसिद्धिः ॥ न च शरीरातिरिक्तात्मवादिनोऽप्ययं दोषः ॥ तन्मते सर्वत्र व्यापकस्य आत्मनः शरीरावच्छेदेनैव दुःखादि-रूपलब्धेरिति वाच्यम् ॥ प्राणसहितशरीरस्यात्माधिष्ठानत्वेन तस्यो-च्छेदजन्यदुःखदानद्वारेणैव तस्य हिंसात्वात् ॥ त्वन्मते शरीरस्यैव सुखदुःखाश्रयत्वात् मृतशरीरदाहदाहस्थले हिंसा दुर्वारैव ॥ किंच वीतरागस्य शरीराभिमानहीनस्य मोक्षकथनादपि शरीरातिरिक्तात्म-सिद्धिः ॥ त्वन्मते शरीरस्यैवात्मत्वात् तस्मिन् कस्य विरागः ॥ इति सर्वथानुपपन्नो ऽतिस्थूलमतिश्चार्वाकपशुः ॥ अतो देहस्य नाशएव मोक्ष इति तस्य सिद्धान्तोपि न संगच्छते इत्यलं ॥

(बौद्धमतेमोक्षविचारः)

बौद्धास्तु चत्वारो माध्यमिकसौत्रान्तिकवैभाषिक योगाचार भेदेनेति पूर्वमेवोपपादितं ॥ तत्र माध्यमिकमते सर्वशून्यतैव मोक्ष इति सुतरामनुपपन्नं ॥ सर्वस्यैव शून्यत्वे कस्य वा मोक्षः ॥ मोक्षो नाम निरतिशयं सुखं दुःखाभावश्च ॥ सुखं नाम सर्वदा केनचिदनुभू-यतएव ॥ नहि अज्ञातसत्तां सुखादीनां कश्चिदङ्गीकुरुते ॥ एवंच सुख-रूपमोक्षस्य भोक्त्रभावादनुपपत्तिः ॥ अपि च सर्वोपि सचेतनः स्व-सुखायैव यतमानो लोके दरीदृश्यते ॥ मोक्षोपि सुखरूपः तन्नाशो यत्नः सदात्मवादिनां युज्यते ॥ त्वन्मते तु आत्मोच्छेदरूपमात्मनाशरूपं कथं सचेतनाः प्रयतेरन् ॥ प्रयतमानाश्च कथं देवानां प्रियत्वमभिमतां न भजेरन् ॥ विज्ञानास्तित्वमात्रवादिनां मते संभवेदपि ॥ तन्मते न सर्वशून्यता मोक्षः किंतु विषयजन्या इमे भावा इति तथाऽनवरतं अनाद्यज्ञानजनित संस्कारप्रचुरितं विज्ञानम् तत्तदाकारेण परिणमति ॥ तत्र घटनीला-दिरूपाः पदार्थाः भासन्ते ॥ यदा तु सर्वं शून्यमिति भावनोपचित्यादि सत्प्रकर्षेण चित्तविषयकमनं अन्तःकरणं स्वरूपेणैव परिणमतीत्यम् निर्वृत्तिः तदा सा स्वरूपसंपादनं स्फुरति ॥ न च बाह्यः पदार्था-

भूतानां पदार्थानां चित्तकल्पितत्वे किं प्रमाणं अपिच यदा घटं पश्यति देवदत्तस्तदापि सोऽस्त्येवान्यदापि सएवेति देवदत्तचित्तवृत्ते घटोऽन्यएवेति कथंचित्तचैत्याभावा इतिनयः॥ कथंच विज्ञानस्य तस्य मोक्षावस्थायां परिणामित्वामितिवाच्यम्॥ इदं रजतं, एष घटः इत्यत्र भ्रम प्रमा साधारणे ज्ञाने सर्वत्र प्रथमं ज्ञानं तस्य पदार्थस्य जायते ॥ अथ च स बहिरवभासते नैवं ज्ञानं पदार्थाव्यभिचारि। स्वप्नस्थले पदार्था न सन्ति ॥ अथ च ज्ञानं जायते ॥ तस्माज्ज्ञानमेव सर्वं तत्तद्विषयाकारेण भासमानं भासते न परमार्थसद्वस्तु ज्ञानाद्भिद्यते॥ अपि च यथा भ्रमस्थले इदं रजतम् इत्यत्र रजतस्य बाधो जायते नैवमिदंत्वस्य, तस्य पारमार्थिकत्वात्॥ तथाचान्तर्वर्ति रजतं बहिरवभासते ॥ बहिः संसर्गमात्रं बाधितं भवति इत्यागतमेव भावानां चित्तकल्पितत्वम् ॥ एवं मोक्षावस्थायामपि विज्ञानं परिणमदेवावतिष्ठते ॥ यत्सत्तत्क्षणिकमिति व्याप्तेः॥ एतन्मते यद्यपि कथञ्चिन्मोक्षार्थं प्रवृत्तिः संगच्छेत परंच कृतविप्रणाशाकृताभ्यागमस्य दोषस्य दुर्वारत्वम् ॥ तथाहि अंतःकरणंहि क्षणिकमेव सत्वात्॥ इति अधुना मया यतितव्यं मोक्षार्थम्॥ मोक्षो हि नामानंतजन्मसाध्यपुण्यसंचयसाध्यइति तदवस्थायां न प्रयत्नकृदंतःकरणम्, मोक्षसुखभुक् अन्यदेवेति कृतविप्रणाशाकृताभ्यागमोदुर्वारएव ॥ न च तदेवान्तःकरणं स्वपरिणामरूपेण तदवस्थायां विद्यते इति वाच्यम्॥ परिणामस्य अन्यत्वात् ॥ अन्यथा पशुदेहधारणावस्थायां विद्यमानमन्तःकरणं मनुष्यदेहे प्राप्तेपि स्वोचितां क्रियां कुर्यात्॥ अपिचान्तःकरणमेवात्मेतिनसाधु ॥ अन्तःकरणस्य भावविकारत्वात् जडत्वम् तथाच तस्य चेतनत्वं व्याहतम् ॥ न च यथा दीपो जडोऽपि घटादीन् जडान्पदार्थानवभासयति तथा चित्तं जडमपि घटादीनवभासयेत् आत्मानमपीति नकाचिदनुपपत्तिरिति वाच्यम्॥ दृष्टान्तवैषम्यात् ॥ दीपोहि चक्षुःसंयोगमपेक्षते नहि जन्त्वन्धो निबिडान्धकारनाशकारिणीं प्रदीपिकामपि पश्यति तत्कस्य हेतोः। नेत्रस्याभावादिति ॥ आत्मानं प्रदीपं काणाः कुब्जा बाला अपि जानन्ति॥ इति आत्मपक्षे प्रदीपस्य न दृष्टान्तत्वम् ॥ एतेनैवापरा-

[illegible]नन्दरूपं सर्वज्ञानन्दमपि आत्मनः सिद्धं ॥ किंच यथा देवदत्तविष्णुमित्रादिभिर्दृष्टो घटः एक एवेति सर्वज्ञादिसंमतं तथैवा-नेकानुभवे स्फुरदनन्दोऽपि एक एव स्वीकरणीयः ॥ इति विज्ञान [illegible] (विज्ञानवादिमते) आत्मपरिज्ञानधारारूपो मोक्षो न समीचीनः ॥ वैभाषिकयोगाचारयोस्तु मोक्षोऽप्येवंविधो न [illegible] इति सद् ॥

(जैनमते मोक्षविचारः)

(जैनास्तु)- अथ मुक्तिस्वरूपं [illegible] विपरीभूतानि [illegible] सिद्धानामेव [illegible] ॥ येन [illegible] ॥ [illegible]

भारारसंसारसागरे मग्नस्य जीवस्य जैनधर्मविहितकर्माचरणात् समुपचित
धर्माधिक्यादूर्ध्वगतस्य या अलाम्बुवत्स्थितिः सामोक्षः। तदपि न युज्यते।
प्रथमतो देहपरिमाणत्वमेवात्मनो व्याहतम् ॥ यदि चात्मासावयवो
विकारीस्यात् तदा पुनः कृतविप्रणाशाकृताभ्यागमप्रसंगो दुर्वारएव
नहि पिपीलिकादेहे दुःखमनुभवन् देवदेहे सुखमनुभवन् एक एवात्मा,
तस्य परमाणुमात्रस्यप्राप्तिहतत्वेन भिन्नत्वात् ॥ अपि च स्थूलदेहेनानुष्ठीय-
मानधर्माश्रयत्वं किं सर्वेष्वपि जीवावयवेषु विद्यते उत केषुचित् ॥
अंते विनिगमकाभावः आद्ये च तादृशधर्माश्रयाणां सर्वेषामणूनाम-
भावात् कथं द्व्यणुकत्र्यणुकादीनां प्राप्तिः। नहि दंडचक्रचीवराद्यनेककारण
समवधानजन्यो घटःकेवलदण्डसमवधानेसति भवति ॥ अवंध्यत्वचीव
ोनां धारणतां न खण्डयति ॥ अपि च किमर्थं एषप्रयासो जैन
ृत इति न जानीमहे ॥ नहि जैनमतेप्यात्मनोऽखण्डत्वम् तस
ावयवत्वेनानित्यत्वात् प्रयुत देहात्मवादिनामेव समीचीनत्वं तदपेक्ष
ागवान् दूषणं च समानमेव ॥ किंच, सुधाबिन्दुदृष्टान्तेन यत्सावय
न्यात्मनश्चेतनत्वमुपपादितम् तदपि न संभवति यथा बिन्दुषु म
मदकारणत्वमस्ति इति सर्ववादिसम्मतम् नैव घटपटाद्यवयवेषु प
णुषु चेतनत्वमस्तीति केनाप्यभ्युपगतम् ॥ तत्र च यथा चपकमये
जनकत्वं प्रत्यक्षतो दृश्यते ॥ नैवं घटेप्यनुकारी चेतनत्वं दृश्यते।
तत्कारणेष्वपि चेतनत्वं गूढमभ्युपगच्छामः ॥ तथा च कृतवि
कृताभ्यागमदोषस्य जागरूकत्वात्सेयं जीवस्यालाम्बुवत्स्थितिरपि
भ्युपगतो मोक्षः समीचीन इति ॥

(न्यायवैशेषिकयोर्मोक्षविचारः)

'नास्तिकाः' 'चार्वाकचतुर्विधबौद्ध जैनभेदेन' प
तेषु सर्वेषु कृतविप्रणाशाकृताभ्यागमदोषस्य वज्रलेपायि
गौतमकाणादौ
न्यायवैशेषिकशास्त्रप्रणेतारौ

जिहीर्षया संतमखण्डं नित्यमात्मानं स्वीकुर्वन्ति ॥ एवं च पिपीलिक देवदेहावच्छेदेन सुखदुःखानुभवकर्तुरेकत्वात् न नास्ति कदोषावसरः। ननु नैयायिकमते नात्माणुः, तथासति सुखदुःखादीनामात्मगुणत्वा तत्प्रत्यक्षे च महत्त्वस्य कारणत्वात् आत्मगत सुखदुःखादीन प्रत्यक्षं न स्यात् नापि मध्यमपरिमाणकः तथा सति यन्मध्यमपरिमाणं तदनित्यमिति व्याप्त्या तस्यानित्यत्वं स्यात् ॥ परिशेषाद्विभुत्वमिति कथंपिपीलिकाशरीरं विहाय मनुष्यदेहं प्राप्नुयात् ? अक्रियात्वात् ॥ इति चेत्सत्यम् ॥ मनएव तत्र तत्र गच्छति नात्मा । न च भोक्तात्मा कार्यकर्तृ तु मनः कथं वैयधिकरण्येन कार्यकारणभावइतिवाच्यम् ॥ धर्माधर्माश्रयकर्तृ भोक्त्रात्मनः प्रेरमितृत्वेन सर्वदोषाभावात् ॥ यथाहि कंदुकप्रेरणेन तत्प्रेरयितैव सुखी दुःखी भवति ॥तदनुकूला च कृति-रपि तस्मिन्नेव भवति ॥ कंदुकस्तु केवलं क्रियाश्रयो भवति एवं मनः केवलं सुखदुःखप्रत्यक्षे कारणं भवति ॥ तद्गोक्तातु जीवएवेति न वैयधिकरण्यम् ॥ एवं च मनएव तत्र गच्छति यत्र च भोक्तृत्वं तस्य धर्माधर्माभ्यां संभवति। न च विभुत्वे परगतसुखादेः प्रत्यक्षं कथं नेति वाच्यम् ॥ इंद्रियसंयोगसहकृतात्ममनःसंयोगस्य तत्प्रत्यक्षं प्रति कारण-त्वात् नानुपपत्तिः ॥ न चैकदा यदिंद्रियसहकृतमनःसंयोगः तदानी मन्यस्यापि मनःसंयोगस्य विद्यमानत्वात् पुनरप्येपापत्तिर्दुर्वारैवेति वाच्यम् ॥ तत्तदज्ञानसहकृतत्वमेव वैजात्यमृतत्तदात्ममनःसंयोगे निवे-श्यते॥ तत्तदज्ञानजनितधर्माधर्मौ हि तत्र तत्रैवासक्तिं मनसो जनयतः ॥ तया च तदात्मगतानेव धर्मान् प्रत्यक्षीकरोति नान्यदीयानित्यखिलं निर्मलम् ॥ अपि च जीवस्याणुत्वे सर्वांगीणशैत्यसुखाननुभवः, क्रिया-श्रयत्वाज्जडत्वम्, योगिशरीरेषु सर्वेष्वपि सुखदुःखादिभोक्तृत्वम्, कारीरीष्टिकर्तुरात्मसंयोगाद्दृष्टेः प्रादुर्भावाभ्युपगमसिद्धांतहानिः, इत्या-दीनि षट्‌नि दूषणानि स्वयमूह्यानि ॥ तथा च शरीरादौ योऽनात्मा-त्माभिनिवेशस्तन्मूलकधर्माधर्माभ्यामनिशमिह संसारचक्रे भ्रमतो जीवस्य वेदविहितकर्माचरणशुद्धसत्त्वस्य या देहादावात्मभेदबुद्धिस्तस्यामुदितायां

स क्षीणक्लेशो भवत्यथच देहपातानंतरं केवलं सद्रूपेणावतिष्ठते ॥ न पुनर्बंधाय प्रभवतीत्यर्थः ॥ एवंच नैय्यायिकमते शरीरातिरिक्तात्मज्ञानमेव तत्वज्ञानम् ॥ तस्योदयाद्देहात्मतादात्म्यज्ञानं भ्रमरूपं नश्यति तन्नाशे च दुःखं सर्वमेव नश्यति। तदुक्तम् (दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतरापायादपवर्गः ॥ नच तदानीं कीदृशी आत्मनः स्थितिरिति वाच्यम् ॥ शुद्धसद्रूपेणैव, न चिद्रूपेण नाप्यानंदरूपेण तयोर्जन्यत्वस्वीकारात् ॥ मन्मतेहि आत्मा ज्ञानरूपचेतनायोगाच्चेतनः ॥ न सांख्यसिद्धांतइव स्वतः प्रकाशरूपः तस्य व्यापकत्वेन सर्वदा सर्वत्र परिस्फुरणतापातात् ॥ सुषुप्त्यभावप्रसंगाच्च ॥ मन्मते तु तदानीं मनसः पुरीततिप्रविष्टत्वान्न ज्ञानस्योत्पत्तिरिति भवति सुषुप्तिः ॥ नच नित्यसुखाविर्भावः ॥ सुखस्य नित्यत्वे प्रमाणाभावः ॥ श्रुत्यादौ सुखस्य दुःखाभावरूपत्वपर्यवसानोपपत्तेः ॥ एवंच दुःखाभावरूपो मोक्षः, तस्य भोक्तुः स्थिरस्य सत्वाच्च काप्यनुपपत्तिः ॥ इत्यलं ॥

(सांख्ययोगिनोर्मतेमोक्षविचारः)

शांतब्रह्मोपासकाः सांख्यास्तु नात्मनः कर्तृत्वं स्वीकुर्वन्ति ॥ तथा सुखदुःखादीनामात्मगुणत्वं, तथा ज्ञानप्रकाश्यत्वं च,। अयं तेषांभावः । आत्मकर्तृत्वे तस्य परिणामित्वापत्तिः ॥ तथाहि । कर्तृत्वं नाम यत्नोत्पादानुकूलकृतिमत्त्वम् ॥ कृतिश्च प्रयत्नः तस्याश्च गुणत्वान्निर्गुणे पुरुषेऽसंभवः ॥ यदि च स्वीक्रियते तदा तस्य नित्यत्वापत्त्या जगदाकारेण परिणमंत्या प्रकृत्या साकं संबंधस्य नित्यत्वापत्त्या मोक्षाभावप्रसंगः ॥ अपिच कार्यानुकूलशक्तिमत्वेन तस्य कर्तृत्वं त्वया वक्तव्यम् ॥ तथाच नदीगमनरयजन्यवालुकाराश्यादौ पुरुषस्य कर्तृत्वं न संभवति ॥ प्रकृतेरपि तथैव कर्तृत्वं स्वीकर्तव्यमिति गौरवापत्त्या प्रकृतेरेव कर्तृत्वम् ॥ अतएव प्रकृष्टं करोतीति व्युत्पत्त्या प्रकृतिपदवाच्यत्वं तस्याः ॥ एवंच सुखदुःखादीनां नात्मगुणत्वम् ॥ यद्यात्मगुणत्वं तेषां स्यात् तदा सुखदुःखादीनां कार्यत्वात्

तथाऽऽत्मनोनिर्गुणत्वं युक्तमेव परं च, पुरुषनानात्वस्वीकारं मक्तनिःसत्त्वस्वीकारं च न मर्षयाम इति वदन्ति ॥ तथाहि-पुरुषनानात्वस्वीकारः किमर्थः नचैकात्म्यत्वे बद्धमोक्षव्यवस्थानुपपत्तिः। तदर्थं शास्त्रशिष्यभावानुपपत्तिः, कर्मकांडस्यानर्थक्यंचेति सर्वस्य व्याकुलत्वापातइति वाच्यम्॥ सर्वस्य दोषजातस्य क्रमेण समाधास्यमानत्वात् ॥ प्रथमतो बंधस्य वाऽसत्यत्वं प्रतिपाद्यते, कोहि बंधो नाम, संसारदुःखाक्रांतत्वमितिचेद्दिष्टापत्तिः अस्त्येव व्यवहारदशायां जीवस्य दुःखित्वम् नच त्वन्मते एकस्यैवात्मनः सत्वाज्जीवस्य बंध इति कथं संगच्छतेति वाच्यम् व्यवहारदशायां जीवस्य स्वीकृतत्वात् । न च द्वैतापत्तिः ॥ तस्यापि व्यावहारिकत्वेन स्वीकारात्। अयंभावः। यथा आकाशस्योपाधियोगात् घटाकाशः पटाकाशइति व्यवहारस्तन्निबंधनं कार्यंचापि दृश्यते घटाकाशो याति पटाकाश एतावानिति परं च आकाशस्य न परमार्थतो भेदः उपाधिरेव भिद्यते उपाधिनिमित्तका एव व्यवहारा जायंते एवं चित्तोपाधिगताः सुखदुःखादयो धर्मास्तास्मिन्नेकास्मिन्नेवात्मनि (आकाशतुल्ये) आरोप्यंते वस्तुतः एकमेवाद्वितीयमिति सिद्धांतः। इयं व्यवहारावस्थामात्रं बंधइत्युच्यते तथैव व्यवहाराभावो मोक्ष इत्युदाह्रियते। अयं गूढाशयः-आत्मनः कीदृशः स्वभावः? यदि वास्तविकाज्ञानाश्रयत्वं तदा तस्याज्ञानस्य नाशः कदापि न स्यात् । यथा अग्नेरुष्णत्वं न शिलिपर्शतरप्यपनीयते अथ यदापनीयते तदा तदौपाधिकमिति स्वीकरणीयं यथा स्फटिकलौहित्यनिराकरणे जपादूरीकरणं। नैवं स्फटिकधवलं निराकर्तुं शक्यं, तस्य स्वाभाविकत्वात् एवं च तदज्ञानमुपाधिकल्पितमित्यंगीकरणीयम् तथा च आत्मनः कीदृक्तत्त्वमिति विचारे प्रचलिते ' सच्चिदानंद ' रूपत्वं स्वीकरणीयम् । येयं घटादौ सत्ता भासते तत्र सर्वत्राधिष्ठानभूतब्रह्मनिष्ठसत्ता भासते नान्या घटादिषुभासमाना। तथैव घटादीनांप्रकाशकारिणी वृत्तिस्तस्या अपि जडत्वात् तत्प्रकाशकश्च कश्चित्स्वीकरणीयः स एवात्मा,। एवं जगति सुखंदुःखमपीत्युभयोः कल्पनापेक्षया दुःखमात्रं संसारे कल्प्यते, विषयोपभोगे भासमानं सुखं तु सत्त्वाकारांतःकरणवृत्तिप्रतिबिंबितानंदरूपात्मन एव ॥ न च विषोप-

भोगेपि कुतस्तादृशं सुखं न भासते, तदानीमपि वृत्तिप्रकाशार्थपात्रप्रति-विंबस्यावश्यकत्वादिति वाच्यम् । विषयोपभोगस्य सत्वाकारांतःकरण-वृत्त्युदयं प्रत्यकारणत्वात् ॥ न च विषयएव सुखमात्मैव दुःखरूप इति कुतो न वैपरीत्यमिति वाच्यम् ॥मोक्षप्रतिपादकशास्त्रवैयर्थ्यापत्तेः॥विषय-वैराग्योपदेशशास्त्रस्य वैफल्यापत्तेः ॥ अपि च यत्सत्वे यत्सत्वम् यद-भावे यदभावः इत्यन्वयव्यतिरेकाभ्यां कार्यकारणभावो धर्मव्यवस्थापि चावसीयते ॥ यथा जपासंनिधाने लौहित्यं भासते जपाभावे लौहित्या-भावः इत्यन्वयव्यतिरेकाभ्यां लौहित्यं जपाया धर्मइति ॥ तथा संसार सत्वे दुःखं, संसाराभावे नाम-विषयाभावे, सुखं, यथा सुषुप्त्यवस्था-यामिति संसारस्य दुःखरूपत्वं, परमात्मनश्च सुखरूपत्वस्वीकारेणैव विषयेषु सुखाभासोपपत्तौ सांसारिकेषुविषयेषु पृथक्सुखसत्ताकल्पने मानाभावः तथा च शास्त्रोपदेशोपि सांख्यमतइवास्माकमपि समान एव ॥ सांख्यमते आत्मनः स्वरूपं सच्चिद्रूपमेव स्वीकृतम् वेदांतिनये तस्यानंदरूपत्वमप्याधिकं स्वीकृतमिति विशेषः ॥ नन्वात्मनो यथातथा धर्मा भवन्तु परं च सर्वस्य जगतः कथं मिथ्यात्वं कथं च सत्यमितिचे-दत्रोच्यते सत्वंहि अर्थक्रियाकारित्वं तच्च मिथ्याभूते शुक्तिरजतेप्यास्ति नहि शुक्तिरजतं दृष्ट्वा तल्लाभलोभलुब्धः सजवं न धावति तच्च लब्ध्वा सुखिनमात्मानं न मन्यते ॥ परं च यदा विशेषदर्शनतः शुक्तिरियं न रजतमिति ज्ञानं जायते तदानीमेवायं तन्मिथ्या मन्यते न प्राक् ॥ ततो ऽज्ञानात्पूर्वं तस्य शुक्तिरजतस्य प्रातिभासिकं सत्वं स्वीक्रियते, तथा व्यावहारिकं सत्वं जगतो ऽस्त्येवेत्यर्थक्रियाकारित्वमुपपन्नम् ॥ नच पारमार्थिकमेवार्थक्रियाकारित्वम् कुतो न स्वीक्रियतइति वाच्यं ॥ तस्याज्ञानमूलकत्वेन बाधितत्वात् ॥ अयं भावः॥ योऽयंप्रत्यक्षतो दृश्य-मानो नामरूपाभ्यांव्याकृतः संसारस्तेन कस्यच संबंधः ॥ अभिमान एव ॥ यतो देहादौ प्रथमतः 'तादात्म्याध्यासं' कृत्वा पश्चाद्विषयेषु 'संसर्गाध्यासं' करोति,ततस्तस्याप्त्यप्राप्तिकृते सुखदुःखे आत्मनि समा-रोपयति । यथा-बाल्ये गृहे क्रीडंती मद्गृहमाते वेश्मिनीः काचिद्बाला आस ॥ तया सह नानाविधं पर्याक्रीडतो मे मनसि न किंचिद्विक्रिया

ऽजनि ॥ परं च यदा तया सह मम विवाहो जातः ततो मां द्र
सा लज्जावत्यभूत ॥ तां च पश्यतो मे मनसि मन्मथविकारा अजायं
तां यदि कोप्यन्यो द्रष्टुं वांच्छति चेत्तदानीमिव मन्मे क्रोधोऽभूतां
अस्य सर्वस्य कार्यजातस्य किं कारणमिति सुधियः सूक्ष्मबु
विचारयंतु ॥ विचार्यमाणे ऽवश्यमेतत्प्रतिभाति ॥ नाभिनिवेशा
ऽप्यानर्थव्रातप्याप्यन्यत्कारणमिति ॥ अयमेवाभिनिवेशो ऽज्ञाने मात्र
पदेन व्यवह्रियते तस्मादेहादौ प्रथमतः तादात्म्याध्यासं कृत्वा संस
ध्यासः कृत इति अज्ञानकल्पितमेतज्जगत्–अज्ञानमूलकत्वात् यथा
दर्शितकथानकगतकांताकांताभिमानवत् इति सिद्धं ॥ अपिचानिर्व
नीयत्वमपि मिथ्यात्वगमकमिति तत्र तत्राद्वैतग्रंथे स्फुटीकृतमिति वि
ष्यते ॥ तत्श्चाद्वैतवादिनां मते सकलानर्थव्रातनिवृत्तिपूर्वक स्वस्वानंद
प्राप्तिर्मोक्ष इति सिद्धं ॥ तस्य कारणं तत्त्वज्ञानं तच्च ' सत्यं ज्ञानमनं
ब्रह्म ' एकमेवाद्वितीयं ब्रह्म, नेहनानास्ति किंचन इत्यादिश्रुत्यनुमा
प्रमाणवाक्यविचारजमिति सुधिय एव विदांकुर्वंतु ॥

(द्वैतवादिना मध्ये रामानुज, माध्व, वल्लभ, निंबारकाणां मते)

तत्र तावत् रामानुजा भेदाभेदवादिनो जीवं कार्यब्रह्म
परमेश्वरं कारणब्रह्मरूपं मन्वाना इदानीमिव पारमार्थिकमपि द्वैतं
ष्यांदृशि। तत्र च प्रमाणमुभेदाभेदावेव। सर्वोहि पदार्थो भिन्नाभिन्न
वर्तते ॥ अयं भावः ॥ योऽयं घटोऽस्ति स कार्यरूपेण भिन्नोऽपि कारण
रूपेणाभिन्नएव। यद्यन्यत्र भेदः स्वीक्रियते तदा घटपटयोरिव मृत्तिक
विहाय घटस्तिष्ठेत् ॥ अयत्वान्यत्वमभिन्नत्वा घट इति व्यवहारानुप
पत्तेः ॥ एवं च स घटः कार्यरूपेण भिन्नोऽपि मृत्तिकारूपेणाभिन्न
यथा, । तथायं जीवः परमेश्वररूपेणाभिन्नोऽपि जीवरूपेणभिन्नएव
दत्र व्यापकत्वेन ज्ञानकर्तृत्वादीनां सामर्थ्यम् व्याप्यत्वेन कर्तृत्व
पूर्वमार्गेपि सार्वज्ञ्याभावादिकं भवति ॥ अन्यथा केवलाद्वैतवादिन

र्मकांडश्रुतिविरोधः केवलाद्वैतवादिनां ज्ञानकांडश्रुतिविरोधो दुर्वार
एव ॥ अस्माकं तु सर्वं सुस्थं ॥ नच मन्यते मोक्षानुपपत्तिः, वैदिककर्मा-
चरणसंशुद्धचेतसो जीवस्य श्रीमद्वैकुंठेशपादकमलध्याननिश्चलीकृत-
चेतसः तत्प्रसादाद्यः सुखप्रादुर्भावः स एव मोक्षः ॥ नच तदानीमप्यै-
क्यम्, तदानीमपि भेदस्य विद्यमानत्वात् भेदाभेदवादिनोहि वयम्
(माध्वास्तु) न भेदाभेदपक्षं रोचयंते ॥ किंतु जीवोहि नाम दासः
श्रीहरेः सचात्यंतं भिन्नः, दुःखित्वात् नित्यनिर्मलोऽखंडानंतगुणपरिपूर्णो
भगवान्नारायणः तद्भक्तिश्चाव्यभिचारिणी मोक्षकारणं ॥ मोक्षोहिनाम
निरंतरार्चनभजनादिषड्विधभक्तिसंतोषितस्य श्रीहरेः कृपाप्रसादात्तिरो-
भूतनिजसुखप्रादुर्भाव एव ॥ नच तत्रापैक्यम् नित्यानंदपरिछिन्न-
परमात्मानंदाज्जीवस्य तत्कृपालब्धसुखस्य न्यूनत्वात् नच तत्र जीवानां
मुक्तानां साम्यम् तत्रापि न्यूनाधिकभावस्य सत्त्वादिति। अत्यंतभेदवादिनो
वयम् (वल्लभास्तु) शुद्धाद्वैतवादिन एकमेव परमात्मरूपं स्वीकुर्वंति तथा-
द्वैतमतप्रवेशः, तन्मायायाः स्वीकारात् । एकएव नारायणस्तेन तेन रूपेण
परिणमते । नच परिणामित्वाज्जडत्वं, अनंगीकारात् यथा ऐंद्रजालिकः
स्वयमेव एकं हस्तं छिनत्ति अन्यं पर्येयत्यत्रकारणं तत्परैच्छैव नान्यत्
एवं जीवादिभेदेऽपि परिणामी स परमेश्वरः स्वतंत्रेच्छः तेन तेन रूपेण
यतिष्ठते तेन व्यवहारश्च प्रचलति मोक्षस्तु परमवैकुंठनिवासिना स
श्व्यभोगप्राप्तिरेव तथाचोक्तं, " सोऽश्नुते सर्वान्कामान् सह ब्रह्मण
श्चिता " इति श्रुतौ । तत्र च श्रीकृष्णभक्तिरेव कारणमिति वदंति
त्यारकाभ्यंपवमेवेत्यलं विस्तरेण ॥

(एषुपरमपुरुषार्थत्वं कस्येतिविचारः)

धर्मार्थकाममोक्षभेदेन चतुर्णां पुरुषार्थानां मध्ये मोक्ष
रमपुरुषार्थः ॥ तथाहि । धर्मस्य पुरुषार्थत्वं सुखसाधनत्वेन
यागजन्येनापूर्वरूपनामांतरेण धर्मेण परलोके सुखं जायते इति
स्वर्गसुखमेव निरतिशयं सुखं । 'क्षीणे
ख्याभिर्दुःखमुपेयं ॥ न च स्वर्गसुखमेव निरतिशयं सुखं । 'क्षीणे

मर्त्यलोकं विशंति' इत्यादिभिः श्रुतिभिर्यज्जन्यं तदनित्यमित्यादि युक्तिभिश्च तस्यानित्यत्वस्वीकारात् ॥ नच "अपामसोमममृता अभूम" इत्यादिश्रुतिविरोधात्तस्यासत्तर्कत्वमिति वाच्यम् ॥ कल्पक्षयावधिपर्यन्तं तस्यामृतत्वात् एवंच मोक्षसुखस्यैव निरतिशयत्वम् नित्यत्वं च वाच्यम्॥ तत्र च प्रमाणम् "पुरुषं प्राप्य कालवार्ता न विद्यते" "न स पुनरावर्तते" इत्यादयः श्रुतयः स्मृतयः ॥ न च तस्यापि स्वीकार्यमनित्यं तमुद्दिश्य धर्माचरणस्य विधानादिति सोप्यनित्यः स्यादिति वाच्यम्॥ अज्ञाननिवृत्तेरेव मोक्षपदार्थत्वात् ॥ नित्यविधिविहितकर्माचरणेन मलिनं चेतः कामक्रोधदोषदूरीकरणपूर्वकं स्वच्छं भवति ॥ तथासति अज्ञानं परमात्मतत्त्वज्ञानाद्विनश्यति सा अवस्थामोक्षपदेन व्यवह्रियते ॥ एवं चैकविंशतिदुःखध्वंसपूर्विका या स्वानंदाव्याप्तिः सैवमोक्षः तत्र च कामक्रोधादिरूपमलनिर्धूननद्वारा धर्मस्य प्रयोज्यत्वान्मोक्षस्यैव परम पुरुषार्थत्वम् ॥ एवमर्थस्यापि । अर्थोपि मोक्षसाधकयज्ञसाधनत्वेन कांक्ष्यते अत्र च प्रमाणं च "अथ जाया मे स्यात् प्रजायेयेति" "अथ वित्तं मे स्यात्कर्मकुर्वीयेति श्रुतिः ॥" नच लौकिकसुखार्थत्वेन तस्य पुरुषार्थत्वं शक्यम् ॥ तस्य च प्रागेव सविपाकत्वद्धेयत्वेन पुरुषार्थत्वाभावात्। कामस्यापि प्रजासाधनत्वेनेष्टत्वात् तस्याः (प्रजायाः) संमतिपत्ति प्रयोजकत्वेन परम्परया मोक्षरूपसाधनत्वेन तस्य परम्परया मोक्षसाधनत्वात् ॥ मोक्षस्य तु इतरेच्छानधीनेच्छाविषयत्वात्तस्यैव परपुरुषार्थत्वम्॥ धर्मकामार्थानां तु मोक्षेच्छाधीनेच्छाविषयत्वात्तेष्वापरमपुरुषार्थत्वम् तत्रापि धर्मार्थकामानां मध्ये धर्मस्यैव मुख्यार्थत्वं । तथाहि । अर्थस्य कामनाहि परमसुखरूपमोक्षसाधकधर्मसाधनत्वेनकार्या । अन्यथा यदि स्वेच्छावर्तनार्थं द्रव्यं कामयेत् तदा तदधर्मायैवेति तस्य नरकप्राप्तिरेव नियता ॥ तथा च धर्मसाधनार्थयार्थकामनेति तस्यापि धर्मसाधनतया धर्मापेक्षया गौणं पुरुषार्थत्वं ॥ एवं कामोपि धर्मार्थ एव । पुत्रोत्पादनार्थं हि पत्न्यासाकं विधीयमानः कामः स्वस्य मोक्षप्रदातृत्वेन धर्मं जनयति ॥ अयं भावः । यथा विधानं पुत्रमुत्पाद्य यदि सम्मतिपत्ति

कर्म क्रियते चेत्तस्य कर्तुरात्मनि-संस्कारमुत्पाद्य समष्टिरूपेण-ब्रह्मलोक-प्राप्तिरूपमोक्षं विदधाति नच कामो नाम यथेच्छं संचारः ॥ तथासति नानाविधकुकर्मकारित्वादधर्मबाहुल्यमेवार्जितं-स्यात्तु धर्मलेशोपि-यासति पापिभिर्योग्या गतिर्लभ्येति नाधोगति स्तस्य सुलभा स्यात् स्मादिदं सिद्धं कामोऽपि मोक्षं कुर्वाणो-धर्मद्वारमपेक्षते इति ॥ ननु-र्ममोक्षयोः क्रमादस्तु गौणपरमपुरुषार्थत्वम् कामार्थयोस्तु तत्कथमिति वच्यताम् ॥ अर्थेसति कामस्य जायमानत्वात् पूर्वमर्थः प्रतिपादितः श्रुतौ ॥ इतिसामान्यतोऽर्थः प्रतिपादितः विशेषंश्चैषां-कार्यकारणभावे निरूपयिष्यामः—

(धर्मार्थकाममोक्षाणां कार्यकारणभावविचारः)

मनुष्योहि-जायमानस्त्रिभिर्ऋणैर्युक्तो जायतइत्यादि श्रुतिपर्यालोचनादज्ञान मनादीति-तस्य क्षयार्थं प्रथमतो धर्माचरणं कर्तव्यं ॥ एतदेवाभिप्रेत्य ब्रह्मचर्याश्रमे वेदाध्ययनादीनां कर्मणां विधानात्-एवंच तत्र विहितानां यथाविधानमाचरणात् प्रकृष्टो धर्मोऽभिजायते । तेन पूर्वजन्मदुरितं सर्वमपि नश्यति ॥ अग्रे जायमानानां कामानामभिवृद्धिर्जायते ॥ तथाच सिद्धं धर्मस्य सर्वपुरुषार्थमूलत्वम् एतदेवाभिप्रेत्योक्तेषु चतुर्षु पुरुषार्थेषु प्रथमतो धर्मस्योपादानं कृतम् ॥ न च अल्पाच्तरमित्यनेन-पूर्वनिपातः॥ सर्वेषामेवहि-समानाच्कत्वेन विशेषाभावात् ॥ जाते धर्मे यदि स प्रकृष्टः शुद्धः श्वेतः स्यात् तदा विरक्तः स मोक्षधर्ममेवाश्रयते ॥ तदुक्तम् । यदहरेव विरजेत्तदहरेव-प्रव्रजेत् ॥ तथाचार्थकामौ त्यक्त्वा स शुद्धसत्वः साक्षादेवकैवल्यं लब्ध्वा कृतकृत्यो भवति ॥ यस्य तु वासना नापैति-नात्यंतं वैराग्यमस्ति तेन तादृशशुद्धधर्मोत्पादनाय यागादयः कर्तव्या एव ॥ नहि वासनानां भोगादृते क्षयः ॥ नच तत्वज्ञानात्क्षयः, तथाचोक्तम् "यथैधांसि-समिद्धोग्निर्भस्मसात्कुरुतेऽर्जुन " इत्यादिगीतास्विति वाच्यम्, समुदाचरद्रूपवृत्तीनां वासनानां हि भोगात्तपसा च क्षयोनाम क्षीणभावः कर्तव्यः जातासु क्षीणासु वृत्तिषु तासां ज्ञानेन निर्मूलनं भवति । अत-

स्तादृशधर्मोपेक्षणीयः । तादृशधर्मोदयार्थं अर्थकामौ वेदविहितकर्मा-
विरोधेन सेवनीयाविति तावपि पुरुषार्थौ परमार्थतश्च धर्मः प्रथमतो-
पेक्षणीयोऽज्ञाननिवृत्त्यर्थमिति–प्रथमतः उपदिष्टः ॥ परमः पुरुषार्थो
मोक्ष इति दर्शनार्थं च तस्य च परमोपदेशः ॥ अन्यौ च गौणौपुरुषार्थौ
विति सर्वमवदातम् ॥ सर्वथा यथातथा वा भवतु परंच सर्वेषां दर्शन-
काराणां मते मोक्षो नाम सकलदुःखध्वंसपूर्विका या स्वानंदावाप्तिः
सैवेति सिद्धं तस्य–परमपुरुषार्थत्वम्—

(इमे आर्यधर्मस्य मूलतत्वतां भजन्ते नवेति विचारः)

एते हि धर्मार्थकाममोक्षाः पुरुषार्थाः आर्यधर्मस्य मूलभूता एव। यथाहि–महद्गृहं चिकीर्षुः पूर्वं तस्य मूलं सम्यक् स्थापयति ॥ दृढे च मूले सर्वगृहं दृढं–भवति– । तथास्य सकलस्य स्थावरजंगमात्मकस्य जगतः इष्टानिष्टलाभपरिहारकारणं कर्मजातमुपदिशतो–वेदराशेः मूलं हि पुरुषार्थचतुष्टयमेव । पुरुषार्थमुद्दिश्य हि सर्व एष आर्यधर्मो–वेदरूपेणेश्वरेणोपदिष्ट इति सर्वेषां–आस्तिकानां मतं ॥ कथं हि तेऽस्यार्यधर्मस्य मूलभूताः–कथंचनं तत् पुरुषार्थचतुष्टयमुद्दिश्य वेदेन तानितानि कर्माणि विहितानीति विस्तरेणोपपादयामः । सकलजगत्प्रमाणीभूतेन वेदेनानुशासनसौकर्यार्थं तत्तदधिकारियोग्यतानुसारेण चत्वारो वर्णा स्तत्रापि चत्वार आश्रमाः कल्पिताः ॥ तत्र च द्विजानामेव आश्रमविभागः न शूद्रस्य तस्य सर्वकर्मबहिष्कृतत्वात् ॥ तत्र किंकारणमिति तु चातुर्वर्ण्यविचारे ऽतिनिपुणमुपपादयिष्यामः । तत्र " जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते " इतिवचनात् येषां संस्कारयोग्यता तेषामेव द्विजत्वं न सर्वेषाम् ननु–उक्तवचनेन शूद्राणामपि द्विजत्वं संस्कारात्प्राप्नोतीति चेन्न " अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्यादि वचनपर्यालोचनया यस्यपूर्वं द्विजकुलोत्पत्तिर्नाम–द्विजशुक्रशोणितोत्पन्नत्वम् तस्यैव द्विजत्वम् नान्यस्येति गम्यते ॥ पूर्ववचनेतु शूद्रशब्दो लाक्षणिकः । यथाग्निशब्दो माणवके प्रयुक्तः तस्मात्तस्यबालस्य पूर्वं शूद्रसादृश्यं प्रदर्शयन्नुपनीतं ब्राह्मणबालकं

बोधयति-" तथ सादृश्यं कर्मानुपयोगित्वरूपं-आस्तामयमप्रकृतविचारः॥ तथाच- द्विजानुद्दिश्य ' ब्रह्मचारि ' ' गृहस्थ ' ' वानप्रस्थ ' संन्यासः ' इति चत्वार आश्रमा उपदिष्टाः ॥ ते च द्विजाः ब्राह्मण, क्षत्रिय, वैश्य, भेदेन त्रिविधाः । ब्राह्मणस्य- प्रकृत्या- शुद्धसत्वस्याध्यापनम्, प्रति- गृहश्च नियतम् विहितमन्यानि च साधारणानि कर्माणि—

तथाच मनुः— अध्यापनमध्ययनं यजनं याजनं तथा ॥
दानं प्रतिगृहं चैव ब्राह्मणानामकल्पयत्॥ १-८८-

तथा क्षत्रियाणां बलिष्ठत्वाद्रजोगुणाधिक्याच्च सर्वजगत्पालने तेषामधिकारः—

प्रजानां रक्षणं दानमीज्याध्ययनमेव च ।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः ॥-१-८९

वैश्यानां रजोगुणस्य बाहुल्यात्तमसश्चोद्रेकाद्वाणिज्यम्, कुसीद- ग्रहणमेव प्रधानम् ॥

तथाच मनुः—पशूनां रक्षणं दानमीज्याध्ययनमेव च ॥
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च ॥-१-९०-

उपरिनिर्दिष्टस्मृतीनां वचनपर्यालोचनया तादृगतादृशकार्योप- योगिगुणाधिक्यात्तानि तानि कर्माणि संविधाय ते ते वर्णा भगव- तैव विरचिता अनाद्य इति नो मतम्, तदुक्तं-गीतायाम् " चातुर्वर्ण्यं मया प्रोक्तं गुणकर्म विभागशः " इति ॥ आस्तामिदं विवेचनमे- तावदेव । पश्चाच्चातुर्वर्ण्यविचारे-विवेचयिष्यामः । तथाच । ब्राह्मण क्षत्रिय विट् प्रभृतिषु त्रिषुवर्णेषु ते आश्रमाश्चत्वारो विहिताः तदुक्तं मनुना-ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ॥ एते गृहस्थप्रभवा- श्चत्वारः पृथगाश्रयाः इति— १-८७—तत्र प्रथमः ॥ अष्टवर्षं ब्राह्मण- मुपनीय तं साङ्गं वेदमध्यापयतियः सः आचार्यपदवाच्यः तदुक्तम्—

उपनीय तु यच्छिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥-१-४०
एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः ॥
योऽध्यापयति वृत्त्यर्थं उपाध्यायः स उच्यते-१-४१

निषेकादीनि कर्माणि यः करोति यथाविधि ॥
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥–१–१४२

तत्राष्टवर्षपर्यंतं बालकस्य स्वगृहे वासो युक्तोऽन्तःपरं तस्य गुरुर्वे वेदाध्ययनार्थं वासो वेदेन विहितः ॥ तत्र चोपनयनम् तेनैव वेदाध्ययनकारयित्रैव कर्तव्यमित्युत्तमः पक्षः ॥ इदानीं तादृग्गुरोरलाभात्पितैव सावित्रीमुपदिशति ॥ अस्तु ततः उपनयनानंतरं मलहं भिक्षाटनं शौचमध्ययनं अग्निकार्यंच कुर्वता तेन ब्रह्मचारिणा प्रतिवेदं द्वादशवर्षपर्यंतं ब्रह्मचर्यव्रतं पालनीयम्, तदुक्तम् ॥

षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् ॥
तदर्धिकंपादिकं वा ग्रहणांतिकमेव वा ॥ ३–१—

तत्र यावदध्ययनं तेनाष्टविधमैथुनप्रतिषेधः कार्यः तत्र स्वाश्रमस्य स्वरूपप्रतिपादकाः केचनश्लोकाः स्पष्टप्रतिपत्तये ऽनूद्यन्ते—

उपनयनकालः—गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ॥
गर्भादेकादशे–राज्ञो गर्भात्तु द्वादशे विशः ॥–२–३६

भिक्षाटनम्—प्रतिगृह्येप्सितं दण्डमुपस्थायच भास्करम् ॥
प्रदक्षिणं परीत्याग्निं चरेद्भैक्ष्यं यथाविधि ॥–११–४८–

गुरुनिवेदनम्—समाहृत्य तु तद्भैक्ष्यं यावदर्थममायया ॥
निवेद्यगुरवेऽश्नीयादाचम्य प्राङ्मुखस्थितः ॥—

गुरोर्नियोगः—उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ॥
आचारमग्निकार्यं च सन्ध्योपासनमेव च– ६९–

इन्द्रियनियमः—इन्द्रियाणां विचरतां विषयेष्वपहारिषु ॥
संयमे यत्नमातिष्ठेत् विद्वान्यंतेव वाजिनाम् ८८
एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् ॥
कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः ॥ १८०
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः ॥
स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् ॥ १८

नित्यकर्म—अग्नीन्धनं भैक्षचर्या मधःशय्यां गुरोर्हितम् ॥
आसमावर्तनात्कुर्यात् कृतोपनयनो द्विजः ॥ १०८–

वृद्धाभिवादनम्-अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ॥
चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ॥ १२१-

आहारनियमः--वर्जयेन्मधुमांसं च गन्धं माल्यं रसान्स्त्रियः ॥
शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम् १७७-

इत्याद्यनेकविधानेन विहितो ब्रह्मचर्याश्रमः प्रथमो मूलम् सर्वस्य जीवनस्य ॥ योहि बाल्ये यथेच्छाचारी तस्य जीवनमेवाल्पं स्यात् ॥ तत्रापि रोगबाहुल्यं स्वल्पायुः सन्ततिः स्वयमध्ययनाभावाद्धर्मनाप्नुवन्व्याधिपीडितः कष्टसुखेन जीवेत् ॥ यो हि कृषीवलः पूर्वं साधुबीजं वा कार्यं स्थापयति ॥ अथ च कृषिं यथाविधि कर्षयित्वा काले च तस्यां बीजं वपति स प्रचुरं धान्यं शारदि लभते यस्तु बीजमेव भक्षयति तस्य कुतो वर्षपर्यन्तमन्नमिति क्षुधित एवावगच्छन्तु तथाचायं ब्रह्मचर्याश्रमः सर्वेषामग्रिमाणामाश्रमाणामतीवोपकारकः इति प्रथमं स्थापितः । तत्र च सर्वजीवनसाधनं वीर्यं प्रभूतं प्रतिबंधादुपचीयते वीर्योपचये बुद्धिर्वर्धते बुद्धिवृद्धौ विद्या सर्वार्थाना सुक्षेत्रस्थापितान्नेव फलति । विद्याफलं च वित्तं ज्ञानं च तथा च लौकिकं नवीनेन पुण्यकर्माण्यनुष्ठाय पारलौकिकं सुखं जायते । वेदविज्ञानेन च यागाद्यनुष्ठानं ततः शुद्धः फलोदयः सम्पत्तिश्च सरसा तेजस्विनी सुमेधाविनीति सर्वं सुखमयं जगत् ॥ अन्यथा अखिलं दुःखमयमिति स्पष्टमेवेति संक्षेपतः प्रथमाश्रमविचारः—

(अथ गृहस्थाश्रमविचारः)

तत्रोक्तप्रकारेण ब्रह्मचर्याश्रमं सम्यक्प्रतिपाल्यम् गुरुणादिष्टः स्नातको भवेत्—

तथाचोक्तं मनुना-वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ॥
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत् ॥ ३-२-
गुरुणाऽनुमतः स्नात्वा समावृत्तो यथाविधि ॥
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् ॥-३-४

तत्र च कन्यायाः शुभाया लक्षणानि यानि मद्[illegible] तानि न स्वस्य प्रीतये यथा लोके साम्प्रतं समीचीनां कन्यामुद्व[illegible] यन्ति स्वप्रीत्यै-नान्यत्तत्र कारणम् तथा न किं तु कुलीनापत्योत्प[illegible] नार्थम्। यथास्यां जायमानः पुत्रो लोकयो भवेदेतदर्थम्॥ [illegible] जायां प्रति न सर्वदागमनम्, किंतु नियते दिनएव॥

तदुक्तम् मनुना-ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडशस्मृताः॥
चतुर्भिरितरैः सार्धं महोभिः सद्विगर्हितैः॥ ४६
तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या॥
त्रयोदशी च शेषास्तु प्रशस्ता दशरात्रयः॥ ४७
युग्मासु पुत्राजायन्ते स्त्रियोऽयुग्मासु रात्रीषु॥
तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम्॥ ४८

एवं विधानेन स्त्रियमुपगच्छन्नपि सोऽखण्डब्रह्मचर्येव भवति।

तदुक्तम्, मनुना-निंद्यासु अष्टासु चान्यासु स्त्रियोरात्रिषु वर्जयन्॥
ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन्॥ ३-५०

अयं ह्याश्रमः सर्वेषां पोषकः सर्वे ऽन्येआश्रमाः एनमुदरभरणार्थ माश्रयन्ते। तस्मादत्रापि धर्मबाहुल्यमस्त्येव॥ एतदर्थमत्रातिथिसत्कारो विशेषतो विहितः॥ सर्वेभ्यो बलिदानंच विशिष्य विहितम्॥

तदुक्तम् मनुना— भिक्षामप्युदपात्रं वा सत्कृत्य विधिपूर्वकम्॥
वेदतत्त्वार्थविदुषे ब्राह्मणायोपपादयेत्॥ ९६

यद्यपि नास्ति वैभवं तथापि यथाशक्ति सर्वैः सत्कार्य एवातिथिः॥

तदुक्तम् मनुना— तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाच न॥ १०१

मत्रायं ब्राह्मणएवातिथिः नान्यःइति विचारणापि नकार्या—

तदुक्तम् मनुना— वैश्यशूद्रावपि प्राप्तौ कुटुम्बे ऽतिथिधर्मिणौ॥
भोजयेत्सह भृत्यैस्तावानृशंस्यं प्रयोजयन्॥ ११२

एवंप्रकारेण जीवनं यापयतः श्रोत्रियस्य गृहे यतिरपि निपतेच—

चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः ॥
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥ ४-१

तत्रापि लोभाद्धिको भूतद्रोहेन धनसंचयो न कार्यः—
अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ॥
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥ ४-२
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः ॥
अक्लेशेन शरीरस्य कुर्वीत धनसंचयं ॥ ४-३

सेवाविषयेऽजीवननिषेध सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ॥ ५६
कुसूलधान्यको वापि कुम्भीधान्यक एव वा ।
त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा ॥ ५७ ॥

धन्यास्ते लोका येषु सधर्मो यत्रातिथीनामपि पूजना तत्र किं वक्तव्यं स्यात्। यत्र निर्लोभताऽपि अनिर्वचनीया ॥ इदानीं तु परस्पर द्रव्यलुण्ठनतत्परा जनाः स्वकर्मणा गृहाण्यपि स्वजनापयन्ति आत्मानं तावत्पथाद्दिनान्निपतन्ति, तदेवं मत्वाहं यदं पाठयन् शास्त्रार्थं विचारयन् सर्वानतिथीन्पूजयन् ब्राह्मणो यथाशक्ति यागाननुतिष्ठन् तत्र स्वधर्मचयो यद्यन्तीयमिति स्वस्य पदपतिं तदा वानप्रस्थो भवेत्—

तदुक्तम्—एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः ॥
वने वसेत्तु नियतो यथावद्विजितेन्द्रियः ॥ ६-१-

(अथ वानप्रस्थविचारः)

तस्य च विधिः—सन्त्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम् ।
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ॥ ६-३

भक्षविधिः— मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा ॥
एतानेव महायज्ञान्निर्वपेद्विधिपूर्वकम् ॥ ६-५
वसीत चर्म चीरं वा सायं स्नायात्प्रगे तथा ॥
जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ॥ ६-६

न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् ॥
न ग्रामजातान्यार्तोऽपि मूलानि च फलानि च ॥ ६-१६

तत्राप्यतिथिसत्कारः-यद्भक्ष्यं स्यात्ततो दद्याद्बलिं भिक्षां च शक्ति
अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ॥—६-७

व्रतविधिः—भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम् ॥
स्थानासनाभ्यां विहरेत् सवनेषु पियन्नपः ॥ ६-२-

एवं हि कर्म समाचरतो द्विजस्य वेदवेदार्थविदोऽवश्यं वास
क्षीणा भवन्ति ॥ तत्रापि भोजनादिनियमाश्चाधिकं क्लिष्टाः क्रियन्ते।
येन तस्य धातूद्रेको न भवेत् ॥ धातूद्रेके पुनरिन्द्रियग्रामो बलवा
जायेत् ॥ एवं जाते च क्षीणे धातौ तस्य संन्यासाधिकारः वास्त
धिकारपरीक्षार्थं काश्चन विधाः प्रदर्शिताः—

अग्नीनात्मनि वैतानान्समारोप्य यथाविधि ॥
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ॥ ६-२५

ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्वने वसन् ॥
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥ ६-२८

एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन् ॥
विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ॥

एवम्परीक्ष्यात्मवासनाः सर्वासामासां क्षयमवेक्ष्य तदनन्तरं
प्रव्रजेत् ॥

(अथ संन्यासाश्रमविचारः)

तस्य कालः—वनेषु च विहृत्यैवं तृतीयं भागमायुषः ॥
चतुर्थमायुषोभागं त्यक्त्वा संगान्परिव्रजेत् ॥ ६-३३

एतावत्पर्यंतं केवलेन स्मार्तवचनजातेनार्यधर्मस्य मूलभूतं पुरु-
षार्थचतुष्टयमिति समर्थितम्, इदानीन्तु युक्तितोऽपि तदेव मूलमिति
समर्थयामः ॥

लोके हि सर्वेपि लोकाः सुखं कामयमाना दृश्यंते तच्च सुखं वैषयिकमेव तावद्भवतु ॥ तस्य कारणं च शरीरम् यद्यद्धि सुखं जायते लौकिकं, तद्धि सर्वं शरीरावच्छेदेनैव जायते ॥ कामं वदन्तु देहातिरिक्तात्मवादिनो न शरीरमात्मा ॥ तथापि तस्य सुखदुःखे तु शरीराधीन एव। यत्किंचिदपि शरीरं जराक्रान्तं चेत्तदानीमात्मानं दुःखिनं मन्यते तस्मात्सर्वासु सम्पत्तिषु शरीरसम्पत्तिः श्रेष्ठेति निर्विवादम् ॥ तस्यां सत्यां चणका अप्यमृतायन्ते असत्यांचामृतमपि विषायते-सा च तदारम्भकशुक्रशोणिताधिक्यजा ॥ नहि मृत्तिकायामसमीचीनायां समीचीनो घटो भवति ॥ तथाच ब्रह्मचार्याश्रमस्यावश्यकतास्तीति निर्विवादम् ॥ नच येषां देशे चातुर्वर्ण्यमाश्रमव्यवस्थापि च नास्ति तेपि दृढशरीरयष्टयो दृश्यन्ते तथाचाहारादिबाहुल्ये भवति शरीरं सुदृढमिति किं ब्रह्मचर्याश्रमस्यावश्यकत्वमिति वाच्यम् ॥ यथा मृत्तिकापि समीचीना तत्कर्तापि कुशलश्चेत् घटः सर्वाङ्गसुन्दरो जायते नैवं केवलायांमृदि नापि केवले कुंभकारे। अस्मिन्समये दृश्यन्ते यवनादयः आश्रमाचारविहीनाः सुदृढाः परंच ते केवलमाहारसौख्येनैव ॥ यदा तु अस्माकमाचारवतां यदि तादृशो ऽभ्यवहारो लभ्येत तदा वयमपि यवनादीनतीत्य शरीरबलेन भविष्यामः ॥ साम्प्रतं तु दुर्भिक्षपीडिता सर्वा वसुंधरा ॥ तथापि शरीरेण वयं दृढा एवेति अवश्यमाश्रमाचारस्य शरीरसम्पत्तौ कारणत्वम् स्वीकार्यम्, एवं विद्यापि संसारस्थितावावश्यकी नहिविद्याविहीनं कोपि पृच्छति नापि द्रव्यस्य कणिका तेनलभ्यते अलब्धे द्रव्येतु कथमग्रिमाः पुरुषार्थाः इति तत्प्राप्तिरावश्यकी सा पि अस्मिन्नाश्रमे जायते ॥ ततश्च धर्ममस्मिन्साचित्य गार्हस्थो ऽर्थकामौ धर्माविरोधेन लब्ध्वा वानप्रस्थे मोक्षाधिकारयोग्यतां सम्पाद्य सर्वत्र धर्मप्रवृद्धधर्मा संन्यासी भूत्वा निर्ममो ऽन्ते मोक्षं लभते इति युक्त्यापि सिद्धम्, मोक्षे हि अवश्यं कारणं जगति ममत्वाभावः ॥ स च तस्य मिथ्यात्वकथनेन श्रुतिपाठनकाले एव ब्रह्मचारिणा ज्ञायते ततश्च यथाकथंचित्पूर्णवैराग्योत्पादनाय गार्हस्थ्यं वानप्रस्थ्यं निषेव्य संन्यासाश्रमे तस्य मुक्तिर्जायते ममत्वाभावादितिस्पष्टमेव-इत्यलम्—

५

न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् ॥
न ग्रामजातान्यार्तोऽपि मूलानि च फलानि च ॥ ६-१

तत्राप्यतिथिसत्कारः-यद्भक्ष्यं स्यात्ततो दद्याद्बलिं भिक्षां च शक्तितः।
अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ॥—६-७

व्रतविधिः—भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम् ॥
स्थानासनाभ्यां विहरेत् सवनेषु पियन्नपः ॥ ६-२-

एवं हि कर्म समाचरतो द्विजस्य वेदवेदार्थविदोऽवश्यं वासना क्षीणा भवन्ति ॥ तत्रापि भोजनादिनियमाश्चाधिकं क्लिष्टाः क्रियन्ते। येन तस्य धातूद्रेको न भवेत् ॥ धातूद्रेके पुनरिन्द्रियग्रामो बलवान् जायेत् ॥ एवं जाते च क्षीणे धातौ तस्य संन्यासाधिकारः तत्सा-धिकारपरीक्षार्थं काश्चन विधाः प्रदर्शिताः—

अग्नीनात्मनि वैतानान्समारोप्य यथाविधि ॥
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ॥ ६-२५

ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्वने वसन् ॥
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥ ६-२८

एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन् ॥
विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ॥

एवम्परीक्ष्यात्मवासनाः सर्वासामासां क्षयमवेक्ष्य तदनन्तरं प्रव्रजेत् ॥

(अथ संन्यासाश्रमविचारः)

तस्य कालः—वनेषु च विहृत्यैवं तृतीयं भागमायुषः ॥
चतुर्थमायुषोभागं त्यक्त्वा संगान्परिव्रजेत् ॥ ६-३३

एतावत्पर्यंतं केवलेन स्मार्तवचनजातेनार्यधर्मस्य मूलभूतं पुरु-षार्थचतुष्टयमिति समर्थितम्, इदानीन्तु युक्तितोपि तदेव मूलमिति समर्थयामः ॥

